"उलूककाकयोः पक्षौ गृहीत्वा मन्त्रवित्तमः।
आलिख्य वै शरावे निशायाञ्च साध्याक्षर-
संपुटितम् ॥
मन्त्रं स्थापितपवनं सहस्रजप्तं चतुष्पथे निखनेत्
स्तम्भनमेतदवश्यं भविता जगताञ्च नात्र
सन्देहः ॥"
स्थापितपवनं कृतप्राणप्रतिष्ठम्।
"कृत्वा प्रतिकृतिमथवा
श्मशानाङ्गारकेशशववसनजाम्।
सम्यगधिष्ठितपवनां
हृतनाम्नीं समन्त्रललाटाम् ॥
वसनाधिष्ठितपवनां
सहस्रजप्तां तदुल्कया वसनाम्।
दग्धां कृत्वा निखनेत्
श्मशानदेशे सपदि वाक्स्तम्भः ॥
आलिख्य चेष्टकायुगले मन्त्रं सनामपुटितम्।
निशया निशीथकाले सहस्रजप्तं प्रतिष्ठित-
प्राणम् ॥
बन्धनमतितीक्ष्णतरं स्तम्भनमतितीक्ष्णाम्बु-
निःक्षिप्तम्।
लिखितमन्त्रचितामयकीलकं,
सहितकर्म्म सनाम समाहृतम् ॥
कृतजपं त्रिसहस्रकसंख्यया
पथि खनेदथ याननिवारणम्।
विहितनिम्बतरौ रिपुनामयुतं
मनुमिमं निशया कृतनामकम्।
नवसहस्रजपादिसुसाधितं
पथि खनेदथ सैन्यनिरोधनम् ॥"
इति स्तम्भनम् ॥
इति फेत्कारिणीतन्त्रे ५ पटलः ॥ * ॥
अथाग्निस्तम्भनम्।
"मालूरस्य रसं गृह्य जलौकां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम् ॥
शाल्मलीरसमादाय खरमूत्रे निधाय तम्।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम् ॥
वायसी उदरं गृह्य मण्डूकवसया सह।
गुड़िकां कारयेत्तेन ततोऽग्नौ प्रक्षिपेद्वशी ॥
एवमेतत्प्रयोगेण अग्निस्तम्भनमुत्तमम् ॥
रक्तपाटलमूलन्तु अवष्टभ्यश्च मूलकैः।
दिव्यं स्तम्भयते क्षिप्रं पयः पिण्डं बलान्तकम् ॥
मुण्डीतकवचाकुष्ठं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्
गोरोचनां भृङ्गराजं चूर्णीकृत्य घृतं समम्।
दिव्यस्तम्भश्च पीत्वा स्यात् मन्त्रे णानेन वै तथा
ॐ ह्रां अग्निस्तम्भनं कुरु ॥ ॐ नमो भगवते
जलं स्तम्भय स्तम्भय सं समं सके कके कचर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते शिव ॥"
इति गारुड़े पूर्व्वखण्डे। १८६। ११—१८ ॥
प्रकारान्तरं षट्कर्म्मशब्दे द्रष्टव्यम् ॥
स्तम्भनः, पुं, (स्तम्भयतीति। स्तम्भ+णिच्+ल्युः।) कामदेवस्य पञ्चबाणान्तर्गत-बाण-विशेषः। यथा,—
"उन्मादनः शोषणश्च तापनस्तम्भनस्तथा।
सम्मोहनश्च पञ्चैते विख्याताः कामशायकाः ॥"
इति जटाधरः ॥
(स्तम्भके, त्रि। यथा, सुश्रुते। १। ४२।
"कषायः संग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीड़नः क्लेदोपशोषणश्चेति ॥")
स्तम्भितः, त्रि, जड़ीभूतः। जड़ीकृतः। इति स्तम्भशब्दात् इतोऽस्य जाते इतप्रत्ययेन स्तम्भधातोः क्तप्रत्ययेन वा निष्पन्नः ॥
स्तरिमा, (न्) पुं, (स्तृणोति आच्छादयतीति। स्तृ+"हृभृधृसृस्तृभ्य इमनिच्।" उणा० ४। १४१। इति इमनिच्।) तल्पम्। इत्युणादिकोषः ॥
स्तरी, स्त्री, (स्तृणोति आच्छादयतीति। स्तृ+"अवितृस्तृतन्त्रिभ्य ईः।" उणा० ७। १५८। इति ईः।) धूमः। इति हेमचन्द्रः ॥
स्तवः, पुं, (स्तूयतेऽनेनेति। स्तु+अप्।) प्रशंसा। तत्पर्य्यायः। स्तोत्रम् २ नुतिः ३ स्तुतिः ४। इत्यमरः। १। ६। ११ ॥ स्तवनम् ५। इति शब्दरत्नावली ॥ वर्णः ६। इति जटाधरः ॥ (यथा, हरिवंशे। १२९। २८।
"तुष्टाव च तमीशानं मारीचः कश्यपस्तदा।
वेदोक्तैः स्वकृतैश्चैव स्तवैः स्तुत्यं जगद्गुरुम् ॥")
स्तवकः, पुं, (तिष्ठतीति। स्था+"स्थः स्तोऽम्बजवकौ।" उणा० ४। ९६। इति अवकः धातोश्च स्तादेशः।) गुच्छकः। इत्यमरः। २। ४। १६ ॥ "द्वे स्तवके थलो इति ख्याते बहुभिः पुष्पैः फलैर्व्वा संबाधः पल्लवग्रन्थिः गुच्छः। गूयते ध्वन्यते भ्रमरैरत्र गुच्छः। गु घु ङ ङ ध्वनौ नाम्नीति छक्।
'पुष्पादिस्तवके गुच्छो मुक्ताहारकलापयोः।'
इति चवर्गान्तेषु रन्तिदेवः ॥
'स्यात् गुच्छः स्तवके स्तम्बे हारभेदकलापयोः ॥'
इति चवर्गद्वितीयान्ते मेदिनी ॥
स्वार्थे के गुच्छकः गुत्सकः इति च पठन्ति। तदा बुध्यति वेष्टते इति गोधन्ते क्रीड़न्ति भ्रमरा अत्रेति वा गुत्सः। गुध्य वेष्टे गुध ङ क्रीड़े इत्यस्मात् ह्रा नाम्नीति सः। स्वार्थे कः गुत्सकः।
'स्तवके हारभेदे च गुत्सः स्तम्बे च कीर्त्तितः ॥'
इति दन्त्यान्तेषु रुद्रः।
'गुत्सः स्यात् स्तवके स्तम्बे हारभिद्ग्रन्थिपर्णयोः।'
इति दन्त्यसान्तेषु मेदिनी।
'मुकुरः कुट्मलश्चापि स्तवको गुत्सकाविति ॥'
इति हड्डः।
स्तूयते इति स्तवकः। ष्टु ञ ल स्तुतौ अल् स्तवः स्वार्थे अभिधानात् नित्यकः। इति भरतः ॥* स्तुतिः। इतिविश्वः ॥ ग्रन्थपरिच्छेदः। समूहः। इति केचित् ॥ स्तवकारके, त्रि ॥
स्तवरकः, पुं, आवरकः। इति केचित् ॥
स्तावः, पुं, स्तवः। स्तुधातोर्भावे घञ् प्रत्ययेन निष्पन्नः ॥
स्तावकः, त्रि, (स्तौतीति। स्तु+ण्वुल्।) स्तवकर्त्ता। स्तुधातोर्णकप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते। ४। १५। २१।
"स्तावकान् तानभिप्रेत्य पृथुर्वैण्यः प्रतापवान्।
मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् ॥")
स्तिमितः, त्रि, (स्तिम+क्तः।) अचञ्चलः। (यथा, रघुः। १३। ४८।
"एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥"
आर्द्रः। यथा, "स्तिमितोऽचञ्चलार्द्रयोः।" इति मेदिनी ॥
स्तिम्भिः, पुं, (स्तभ्नातीति। स्तम्भ+"क्रमितमिशतिस्तम्भामत इच्च।" उणा० ४। १२१। इति इन् अत इच्च।) समुद्रः। बाधा। इत्युणादिकोषः ॥
स्तीर्व्विः, पुं, (स्तृणातीति। स्तृ+"स्तृ-जहु-स्तृ-जागृभ्यः क्विन्।" उणा० ४। ५४। इति क्विन्।) नभः। रुधिरम्। तृणजातिः। अध्वर्युः। पयः। शक्रः। इति संक्षिप्तसारोणादिवृत्तिः ॥
स्तुतः, त्रि, (स्तु+क्तः।) स्तुतिविषयः। तत्पर्य्यायः। ईलितः २ शस्तः ३ पणायितः ४ पनायितः ५ प्रणुतः ६ पणितः ७ पनितः ८ अपिगीर्णः ९ वर्णितः १० अभिष्टुतः ११। इत्यमरः। ३। २। ११० ॥ गीर्णः १२ ईड़ितः १३। इति शब्दरत्नावली ॥ नुतः १४। इति जटाधरः ॥ (यथा, महाभारते। १२। २८४। १८।
"नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः ॥")
स्तुतिः, स्त्री, (स्तु+क्तिन्।) स्तवः। इत्यमरः। १। ६। ११ ॥ (यथा, नैषधे। ३। ११६।
"इतः स्तुतिः का खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥")
दुर्गा। यथा,—
"स्तुतिः सिद्धिरिति ख्याता श्रियाः संश्रयणाच्च सा।
लक्ष्मीर्वा ललना वापि क्रमात् सा कान्तिरुच्यते"
इति देवीपुराणे ४५ अध्यायः ॥
स्तुतिपाठकः, पुं, (स्तुतिं पठतीति। पठ+ण्वुल्।) राजादेर्य्यात्रादौ वीर्य्यस्तुतिकर्त्ता। तत्पर्य्यायः। वन्दी २। इत्यमरः। २। ८। ९७ ॥ लग्नः ३ स्तुतिव्रतः ४ सूतः ५ मागधः ६ मधुकः ७। इति जटाधरः ॥ प्रातर्गेयः ८। इति त्रिकाण्डशेषः ॥
स्तुतिव्रतः, पुं, (स्तुतिरेव व्रतं यस्य।) स्तुतिपाठकः। इति जटाधरः ॥
स्तुत्यः, त्रि, स्तवनीयः। स्तुधातोः क्यप्प्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम् ॥ (यथा, रघुः। ४। ६।
"परिकल्पितसान्निध्या काले काले च बन्दिषु।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥")
स्तुनकः, पुं, छागः। इति शब्दचन्द्रिका ॥